# Shri Venkatesha Karavalamba Stotra

# श्रीवेङ्कटेश करावलम्बस्तोत्रम्

## Document Information

Text title : Shri Venkatesha Karavalamba Stotra

File name : vnktshkar.itx

Category : vishhnu, venkateshwara, stotra, nRisiMhabhAratIsvAmi, vishnu

Location : doc_vishhnu

Author : Shri Nrisinha Bharati of Shringeri Math

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi, NA

Description-comments : Hymn to Shri Venkatesha

Latest update : May 1, 2001

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 1, 2021

*sanskritdocuments.org*

# श्रीवेङ्कटेश करावलम्बस्तोत्रम्

श्रीशेषशैलसुनिकेतन दिव्यमूर्ते
नारायणाच्युत हरे नलिनायताक्ष ।
लीलाकटाक्षपरिरक्षितसर्वलोक
श्रीवेङ्कटेश मम देहि करावलम्बम् ॥ १॥

ब्रह्मादिवन्दितपदाम्बुज शङ्खपाणे
श्रीमत्सुदर्शनसुशोभितदिव्यहस्त ।
कारुण्यसागर शरण्य सुपुण्यमूर्ते
श्रीवेङ्कटेश मम देहि करावलम्बम् ॥ २॥

वेदान्त-वेद्य भवसागर-कर्णधार
श्रीपद्मनाभ कमलार्चितपादपद्म ।
लोकैक-पावन परात्पर पापहारिन्
श्रीवेङ्कटेश मम देहि करावलम्बम् ॥ ३॥

लक्ष्मीपते निगमलक्ष्य निजस्वरूप
कामादिदोषपरिहारक बोधदायिन् ।
दैत्यादिमर्दन जनार्दन वासुदेव (दैत्यारिमर्दन)
श्रीवेङ्कटेश मम देहि करावलम्बम् ॥ ४॥

तापत्रयं हर विभो रभसान्मुरारे
संरक्ष मां करुणया सरसीरुहाक्ष ।
मच्छिष्यमित्यनुदिनं परिरक्ष विष्णो (मच्छिष्यमप्यनुदिनं)
श्रीवेङ्कटेश मम देहि करावलम्बम् ॥ ५॥

श्रीजातरूपनवरत्नलसत्किरीट-
कस्तूरिकातिलकशोभिललाटदेश ।
राकेन्दुबिम्बवदनाम्बुज वारिजाक्ष
श्रीवेङ्कटेश मम देहि करावलम्बम् ॥ ६॥

वन्दारुलोक-वरदान-वचोविलास
रत्नाढ्यहारपरिशोभित कम्बुकण्ठ ।
केयूररत्न सुविभासि-दिगन्तराल
श्रीवेङ्कटेश मम देहि करावलम्बम् ॥ ७॥

दिव्याङ्गदाङ्कितभुजद्वय मङ्गलात्मन्
केयूरभूषण सुशोभित दीर्घबाहो ।
नागेन्द्र-कङ्कणकरद्वयकामदायिन्
श्रीवेङ्कटेश मम देहि करावलम्बम् ॥ ८॥

स्वामिन् जगद्धरण वारिधिमध्यमग्न
मामुद्धारय कृपया करुणापयोधे ।
लक्ष्मींश्च देहि मम धर्म समृद्धिहेतुं (देहि विपुलामृणवारणाय)
श्रीवेङ्कटेश मम देहि करावलम्बम् ॥ ९॥

दिव्याङ्गरागपरिचर्चितकोमलाङ्ग
पीताम्बरावृततनो तरुणार्क भास
सत्यांचनाभपरिधान सुपत्तु बन्ध
श्रीवेङ्कटेश मम देहि करावलम्बम् ॥ १०॥

रत्नाढ्यदामसुनिबद्ध-कटि-प्रदेश
माणिक्यदर्पणसुसन्निभजानुदेश ।
जङ्घाद्वयेन परिमोहितसर्वलोक
श्रीवेङ्कटेश मम देहि करावलम्बम् ॥ ११॥

लोकैकपावन-सरित्परिशोभिताङ्घ्रे (पावन लसत्परिशोभिताङ्घ्रे)
त्वत्पाददर्शन दिने च ममाघमीश । (दिनेशमहाप्रसादात्)
हार्दं तमश्च सकलं लयमाप भूमन्
श्रीवेङ्कटेश मम देहि करावलम्बम् ॥ १२॥

कामादि-वैरि-निवहोच्युत मे प्रयातः (निवहोऽप्रियतां)
दारिद्र्यमप्यपगतं सकलं दयालो ।
दीनं च मां समवलोक्य दयार्द्रदृष्ट्या
श्रीवेङ्कटेश मम देहि करावलम्बम् ॥ १३॥

श्रीवेङ्कटेशपदपङ्कजषट्पदेन
श्रीमन्नृसिंहयतिना रचितं जगत्याम् ।
एतत्पठन्ति मनुजाः पुरुषोत्तमस्य
ते प्राप्नुवन्ति परमां पदवीं मुरारेः ॥ १४॥

॥ इति श्री शृङ्गेरि जगद्गुरुणा श्रीनृसिंहभारति
स्वामिना रचितं श्रीवेङ्कटेशकरावलम्ब स्तोत्रं सम्पूर्णम् ॥

Encoded by Sunder Hattangadi

*Shri Venkatesha Karavalamba Stotra*

pdf was typeset on May 1, 2021

Please send corrections to *sanskrit@cheerful.com*